भोगः करे षट्पदयोस्तु षट्के
भीतिर्नृणां स्याद्विषवस्य चक्रे ॥
यस्मिन्नृद्धे वसेद्धातुस्तस्मात् संगणयेद्बुधः ॥”
इति समयामृतम् ॥

जलवृश्चिकः, पुं, ( जले वृश्चिक इव । ) चिङ्गट-मत्स्यः । इति त्रिकाण्डशेषः ॥

जलवेतसः, पुं, ( जलजातो वेतसः । ) वानीर-वृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्याया गुणाश्च ।
“निकुञ्चकः परिव्याधो नादेयो जलवेतसः ।
जलजो वेतसः शीतः कुष्ठहृद्वातकोपनः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जलव्यधः, पुं, ( जलं विध्यतीति । व्यध+अच् । ) कङ्कत्रोटमत्स्यः । इति त्रिकाण्डशेषः ॥

जलव्यालः, पुं, ( जलस्थितो व्यालो हिंस्रजन्तुः । ) अलगर्द्दसर्पः । इत्यमरः । १ । ८ । ५ ॥ क्रूर-कर्म्मा जलजन्तुः । इति राजनिर्घण्टः ॥

जलशयः, पुं, ( जले शेते । शी+अच् । पुंसीति घो वा । ) विष्णुः । इति हेमचन्द्रः ।२।१२८॥

जलशयनः, पुं, ( जले क्षीरोदसलिले शेते इति । शी+ल्युः । ) विष्णुः । इति हलायुधः ॥

जलशायी, [न्] पुं, ( जले शेते इति । शी+णिनिः ।) विष्णुः । यथा, पुराणम् ।
“जलमध्ये वराहञ्च पावके जलशायिनम् ॥”

जलशुक्तिः, स्त्री, ( जलचरी शुक्तिः । ) शम्बूकः । इत्यमरः । १ । १० । २३ ॥ शामुक इति जल-सीपी इति च भाषा । तत्पर्य्यायः । वारि-शुक्तिः २ क्रमिशुक्तिः ३ क्षुद्रशुक्तिका ४ शम्बूका ५ नरशुक्तिः ६ पुटिका ७ तोयशुक्तिका ८ । तस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । दीपन-त्वम् । गुल्मशूलविषदोषनाशित्वम् । रुच्यत्वम् । पाचनत्वम् । बलदातृत्वञ्च । इति राजनिर्घण्टः ॥

जलशूकं, क्ली, (जले शूकं सूक्ष्माग्रमिव ।) शैवालम् । इति हेमचन्द्रः ।४।२३३॥ (पुंलिङ्गेऽपि दृश्यते । यथा,—
“जलशूकः स्वयं गुप्ता रजन्यौ ह्यहतीद्वयम् ॥”
इत्युत्तरस्थानेऽष्टादशेऽध्याये वाभटेनोक्तम् ॥ )

जलशूकरः, पुं, ( जले जलस्य वा शूकर इव । ) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१५ ॥

जलसर्पिणी, स्त्री, ( जले सर्पति गच्छतीति । सृप +णिनि+ङीप् ।) जलौका । इति हेमचन्द्रः । ४ । २७० ॥

जलसूचिः, पुं, ( जले सूचिरिव । अभिधानात् पुंस्त्वम् । ) कङ्कत्रोटमत्स्यः । शृङ्गाटः । शिशु-मारः । जलौकायां स्त्री । इति मेदिनी । चे, २० ॥ काकः । इति हेमचन्द्रः ॥

जलस्तम्भनं, क्ली, ( जलस्य स्तम्भनम् । ) मन्त्रादि-द्वारा जलगतिनिवारणम् । तन्मन्त्रो यथा,—
“ओम् नमो भगवते जलं स्तम्भय स्तम्भय संस-
मंसके कचे कचर ।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते ध्रुव ! ॥”
इति गारुडे १७८ अध्यायः ॥

पुस्तकान्तरे १८६ अध्यायः ॥ ( जलस्तम्भनविद्या दुर्य्योधनेन विदितासीत् । अतएवायं द्वैपायन-ह्रदजलं संस्तभ्य तत्र सुष्वाप । एतत्कथा महाभारते शल्यपर्व्वणि २६ अध्याये द्रष्टव्या ॥)

जलस्था, स्त्री, ( जले जलबहुलप्रदेशे तिष्ठतीति । स्था+कः । स्त्रियां टाप् । ) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥ (जलावस्थिते, त्रि । यथा, भाग-वते । ३ । २७ ।१२ ।
“यथा जलस्थ आभासो जलस्थेनावदृश्यते ।
स्वाभासेन तथा सूर्य्यो जलस्थेन दिवि स्थितः ॥”)

जलहं, क्ली, ( जलेन हन्यते इति । हन+बाहु-लकात् डः । ) स्वल्पजलयन्त्रगृहम् । इति त्रिकाण्डशेषः ॥

जलहासः, पुं, ( जलानां हास इव शुक्लत्वात् । ) समुद्रफेनः । इति त्रिकाण्डशेषः ॥

जलाका, स्त्री, ( जले आकायति प्रकाशते इति । आ+कै+कः । ) जलौकाः । इति शब्द-रत्नावली ॥

जलाची, स्त्री, ( जलमञ्चति व्याप्नोति करण-तयेति । अञ्च+अण् । ) जलपिप्पली । इति शब्दरत्नावली ॥

जलाखुः, पुं, ( जले आखुरिव । ) जलनकुलः । इति त्रिकाण्डशेषः ॥

जलाञ्चलं, क्ली, ( जलमञ्चति व्याप्नोतीति । अञ्च +बाहुलकात् अलच् । यद्वा, जले अञ्चलः वस्त्रप्रान्त इव । अभिधानात् क्लीवत्वम् । ) शैवालम् । स्रोतो वारिनिर्गमः । इति मेदिनी । ले, १५४ ॥

जलाटनः, पुं, ( जले अटति भ्रमतीति । अट+ ल्युः । ) कङ्कपक्षी । इति मेदिनी । ने, १८४ ॥ (विशेषोऽस्य कङ्कशब्दे ज्ञातव्यः ॥)

जलाटनी, स्त्री, ( जले अटति भ्रमतीति । अट+ ल्युः । स्त्रियां ङीष् ।) जलौका । इति मेदिनी । ने, १८४ ॥

जलाण्टकः, पुं, ( जले अण्ठते इतस्ततो भ्रम-तीति । अठि गतौ+ण्वुल् । पृषोदरादित्वात् ठस्य टः । ) नक्रराजः । इति हारावली ।७७॥

जलाण्डकं, क्ली, ( जले अण्डमिव कायतीति । कै+कः । ) पोताधानम् । इति शब्दरत्ना-वली ॥

जलात्मिका, स्त्री, ( जलमेव आत्मा यस्याः । कप् ततः टापि अत इत्वम् । ) जलौका । इति शब्दरत्नावली ॥

जलाधारः, पुं, ( जलस्य आधारः । ) जलाशयः । इत्यमरः । १ । १० । २५ ॥ ( यथा, याज्ञ-वल्क्ये । ३ । १४४ ।
“आकाशमेकं हि यथा घटादिषु पृथग् भवेत् ।
तथात्मैकोऽप्यनेकस्तु जलाधारेष्विवांशुमान् ॥”)

जलाधिदैवतः, पुं, ( जलस्याधिदैवतं अधिष्ठात्री देवता । ) वरुणः । इति हलायुधः ॥ ( जलं अधिदैवतं यस्य । ) पूर्व्वाषाढ़ानक्षत्रे, क्ली । इति ज्योतिषम् ॥

जलाम्बिका, स्त्री, ( जलस्य अम्बिका माता इव । क्रोड़देशे जलधारणादस्यास्तथात्वम् । ) कूपः । इति हारावली । ४१ ॥ जलात्मिका इति क्वचित् पाठः ॥

जलायुका, स्त्री, ( जलमायुरस्याः । कप् । पृषो-दरादित्वात् सलोपः । ) जलौका । इति शब्द-रत्नावली ॥ ( यथा, सुश्रुते । १ । १३ ।
“अथ जलायुकाः वक्ष्यन्ते । जलमासामायु-रिति जलायुकाः ॥” अस्या अन्यद्विवरणं जलौकःशब्दे द्रष्टव्यम् ॥ यस्मिन्नियं व्यवहृता तद्यथा,—
“नस्याञ्जनाभ्यञ्जनपानधूमं
तथावपीड़ं कवलग्रहञ्च ।
संशोधनञ्चोभयतः प्रयुञ्ज्या-
दक्तं हरेच्चापि जलायुकाभिः ॥”
इति सुश्रुते कल्पस्थानेऽष्टमेऽध्याये ॥)

जलार्द्रः, पुं, ( जलेन आर्द्रः सिक्तः । ) आर्द्र-वस्त्रम् । इति हारावली । १६६ ॥ (जलसिक्ते, त्रि । यथा, मेघदूते । ४५ ।
“तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ॥”)

जलार्द्रा, स्त्री, ( जलेन आर्द्रा सिक्ता । ) क्लिन्न-वस्त्रम् । इति हेमचन्द्रः । ३ । ३४३ ॥ ( आर्द्र-तालवृन्तम् । यथा, वैजयन्ती ।
“धुवित्रं तालवृन्तं स्यादुत्क्षेपव्यजनञ्च तत् ।
जलेनार्द्रं जलार्द्रा स्यात्———— ॥” )

जलार्णवः, पुं, ( जलप्रचुरोऽर्णवः समुद्रो यत्र काले । ) वर्षाकालः । इति त्रिकाण्डशेषः ॥ ( जलप्रचुरोऽर्णवः । ) जलसमुद्रश्च ॥

जलालुः, पुं, ( जलजात आलुः । शाकपार्थिववत् समासः । ) पानीयालुः । इति राजनिर्घण्टः ॥

जलालुकं, क्ली, ( जलालुरिव कायति प्रकाशते इति । कै+कः । ) पद्मकन्दः । इति राज-निर्घण्टः ॥

जलालुका, स्त्री, ( जले अलति गच्छतीति । अल गतौ+बाहुलकात् उकः । ) जलौका । इति शब्दरत्नावली ॥

जलालोका, स्त्री, ( जले आलोक्यते दृश्यते इति । आ+लोक दर्शने+कर्म्मणि घञ् । ) जलौका । इत्यमरटीकायां भरतः ॥

जलावर्त्तः, पुं, ( जलस्य आवर्त्तः सम्भ्रमः । ) जल-गुल्मः । अम्भसां भ्रमः । इति जटाधरः ॥

जलाशयं, क्ली, ( जले जलबहुलप्रदेशे आशेते इति । आ+शी+अच् । ) उशीरम् । इत्य-मरः । २ । ४ । १६४ ॥ लामज्जकम् । इति राजनिर्घण्टः ॥ ( जलशायिनि, त्रि । यथा, महाभारते । ३ । १४३ । ५४ ।
“ततः सत्त्वान्युपाक्रामन् सुबहूनि महान्ति च ।
रुरुवानरसिंहांश्च महिषांश्च जलाशयान् ॥”)

जलाशयः, पुं, ( जलस्य आश्रय आधारः । ) जलाधारः । स तु पुष्करिण्यादिः । इत्यमरः । १ । १० । २६ ॥ (यथा, मनुः । ४ । १२६ ।